वेदांत — धार्मीक

क्र.नं. २६

24.75

शंकराचार्यकृत — आत्म बोध

४६४/४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# अथश्रीशंकराचार्यकृतआत्मबोधप्रारंभः

श्रीगणेशायनमः ॐ तत्सद्ब्रह्मणेनमः सच्चिदानंदरूपायसर्वधीवृत्तिसाक्षिणे न
मोवेदांतवेद्यायब्रह्मणेऽनंतरूपिणे १ यदज्ञानादिदंभातियज्ज्ञानाद्विनिवर्तते न
मस्तस्मैचिदानंदवपुषेपरमात्मने २ अथाध्यात्मोपदेशविधिंव्याख्यास्यामः
तपोभिःक्षीणपापानांशांतानांवीतरागिणाम् मुमुक्षूणामपेक्ष्योयमात्मबोधोविधी
यते ३ अनात्मभूतेदेहादावात्मबुद्धिस्तुदेहिनाम् साऽविद्यातत्कृतोबंधस्तन्नाशोमो
क्षउच्यते ४ अनादिसांतःनैसर्गिकोऽध्यासः मिथ्याप्रत्ययरूपः सर्वलोकप्रत्यक्षः अ
स्यानर्थहेतोःप्रहरणायब्रह्मात्मैकत्वज्ञानंशिष्यः श्रीगुरुंपरिपृच्छतिभोभगवन् स
आत्माकीदृशस्तच्छृणु सच्चिदानंदाद्वितीयमखंडमचलमजमक्रियंकूटस्थानंतस्व
रूपंज्योतिःस्वप्रकाशंब्रह्मयत्सआत्मा भोभगवन् तर्हिदीर्घेऽस्मिन्संसारेसंसृतिः
कस्य तस्यैव स्वाभाविकीवानैमित्तिकीवा यदिस्वाभाविकीभवति तर्हिअवर्जनीयत्वा
त् ममोक्षाशानास्ति नहिवत्सनैमित्तिकी तर्हिकिंनिमित्तं तत्सावधानमतिःशृणु
स्वाश्रया स्वविषया स्वानुभवगम्या स्वभास्याऽवस्त्वनिर्वाच्याविद्यास्तिसातदाश्रयत्व
स्वविषयत्वबलेनचित्सदानंदाऽनंताद्वितीयस्वभावमावृणोति यथागर्भागारांधकारे १
ण आगारगर्भमाच्छाद्यमिव तथाचिद्रूपंकूटस्थमात्मानंस्वस्वरूपमाच्छाद्यमिव अहं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

ब्रह्मनमनुष्योहमितिविक्षिप्याति नतश्च अनात्मनिदेहादौ आत्मत्वेनाभिमन्यमानः अप्रा
प्ताशेषपुरुषार्थः प्राप्ताशेषानर्थः अविद्यापरिकल्पितैरेवसाधनैः इष्टप्राप्तिमनिष्टनिवृ
त्तिंहृदिआकांक्षमाणस्सन् लौकिकवैदिकस्वाभाविकानुष्ठितैरपिविषयस्यस्वार्थपर
मपुरुषार्थंमोक्षाकांक्षामलभमानः अलाबुवत् मकरादिभिरिवरागद्वेषादिभिरि
तस्ततः आकृष्यमाणः सुरनरतिर्यगादिप्रभेदभिन्नासु नानायोनिषुपरिवर्तमा
नोमोहेन मुह्यमानःसंसरति तथाचश्रुतिः नतंविदाथयइमाजजानान्यद्युष्मा
कमंतरंबभूव नीहारेणप्रावृता जल्प्याचासुतृपउक्थशासश्चरंति स्मृतिरपित
थाचगीतायाम् पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान् कारणंगुणसंगोऽ
स्यसदसद्योनिजन्मसु स्वामिनयुष्मद्वचनमसमंजसमिदंभाति कथमित्थंकूट
स्थचिद्घनैकरसस्यात्मनः शशविषाणसदृशी अविद्यातस्यावरणविक्षेपरूपं
कथंसंभाव्यते यथागगनारविंदमसत्तस्यसुरभित्वंकुतः असंभावनीयत्वात् अस
भावनीयामाया साधुसाधु अरेआत्माविवेकभ्रममात्रसिद्धं भोभगवन् यद्भ्रममा
त्रसिद्धंतत्किंसत्यम् अरेयथा इंद्रजालंपश्यतिजनः व्याघ्रजलउरगादिसत्यत
यानप्रतिभाति किंइंद्रजालभ्रमानिवृत्तेः रज्जुरेवसर्पःनान्यत्किंचिदपितथात्मा

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)



विवेकभ्रमनिवृत्तेः तदनंतरंसर्वंमिथ्येतिज्ञायते इदंतुसर्वेषामनुभवसिद्धम् भो
भगवन् तर्ह्यस्यभ्रमस्यनिवृत्तिःकथम् तच्छृणु अकस्मात्सकथंचित्पुण्यवशाद्वा
वेदोदितेनईश्वरार्थैकर्मानुष्ठानेनापगतरागादिमलः अनित्यादिदर्शनेननित्यानि
त्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः वेदांतवेद्यप्रतीयमानं ब्रह्मात्मभावं
बुभुत्सुरात्मानंज्ञातुमिच्छति ज्ञानादेवतुकैवल्यंप्राप्यतेयेनमुच्यतेइतिश्रुतेः ज्ञा
नंतुश्रवणमनननिदिध्यासनमंतरेणनसंभवति तथाचश्रुतिः आत्मावारेद्रष्टव्यः
श्रोतव्योमंतव्योनिदिध्यासितव्यः त्वंपदार्थविवेकायसन्यासःसर्वकर्मणाम् श्रुत्या
विधीयतेयस्मादन्यथापतितोभवेत् तस्मादाचार्येभ्यःब्रह्मात्मज्ञानप्राप्तिः कथमा
चार्यः अज्ञोवाविज्ञोवास्यात् यदिअज्ञो नब्रह्मात्मैकत्वज्ञानमुपदेष्टुंशक्नुयात् अथवि
ज्ञः तदाब्रह्मात्मज्ञानेनब्रह्मैवभवति तत अज्ञानतत्कार्यदेहद्वयनिवृत्तेः तदादेहा
दिसंबंधाभावात् नशिष्यादिशासनंह्युपपद्यते अथानवगतब्रह्मात्मभावःस्यात्
तस्माद्देहादिसंबंधोऽंगीकर्तव्योऽभ्युपेतव्योयद्यवगतब्रह्मात्मभावःस्यात् तदाज्ञा
नतत्कार्यनिवृत्तेः तस्मादाचार्याधीनंज्ञानमपेक्षतेइतिकृतंवचः अत्रनायंदोषः
ज्ञानिनोब्रह्मात्मज्ञानेजातेतेनबाधितस्यापिसंचितकर्मणःप्रारब्धफलंतस्यकर्म

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

णोबाधितं अतएवज्ञानिनस्तुप्रारब्धवेगवशात् देहादिःप्रतिभासते अथावगतंब्रह्मा
त्मज्ञानंसंप्रदायक्रमेणउपदिश्यते तस्मादाचार्याधीनंज्ञानं ज्ञानात्मोक्षइतिसिद्धम्
तस्मात्वेदोक्तशमदमादिसाधनचतुष्टयसंपन्नोब्रह्मविदमाचार्यमुपेत्य साष्टांगंप्रणि
पातंकृत्वा समित्पाणिःपुरतःउपविश्य विज्ञापयाति तथाचश्रुतिः समित्पाणिःश्रोत्रि
यंब्रह्मनिष्ठंगुरुंतत्वज्ञानार्थमभिगच्छेत् भोभगवन् संसारतापत्रयार्केसंतप्तोहं
अस्यतापस्यनिवृत्तिंकुरुममेतिविज्ञापितःसन् गुरुरुपदिशति कथमित्थंतवब्रह्मात्मै
कत्वज्ञानेजातेसंसारनिवृत्तिर्भविष्यतीति नान्यथा भोभगवन्ममब्रह्मात्मैकभाव
ना तत्केनभविष्यति तत्शृणु आदौत्वंपदशोधनेनजीवत्वंनिरस्यति शुद्धोभविष्यसि
तदाब्रह्मात्मैकभावोभवति यथाग्रामादिस्थितंचंदनवृक्षंअज्ञस्यासंभावनाभवत्येव
नेदंचंदनमिति अस्यस्तदभिज्ञःयुक्त्याबोधयति कटुकंसुगंधंशीतलंपीतवर्णंचंदन
मिति तथाचश्रुत्यावधारितस्यतत्त्वंब्रह्ममहावाक्यार्थस्य तात्पर्यंगुरुर्युक्त्याप्रतिबोध
यति चित्सदानंदस्वरूपंत्वंनदासंभावयाति भोभगवन् साशोधनयुक्तिःकथम्
इत्थं अरेशिष्य इदंशरीरंदृश्यंजडमनित्यममंगलंत्वंनभवासि भोभगवन् दृश्यंज
डमनित्यममंगलंकथंइत्थं एतच्छरीरोत्पत्तेःप्रागेतच्छरीरंतवनास्ति यतःइदंशरी

(५)

आ०बो० रंत्वंनभवसि एतच्छरीरनाशादूर्ध्वमेतच्छरीरंनास्तियतः एतच्छरीरंत्वंनभवसि अतो
३ वर्तमानेऽपिइदंदृश्यंशरीरंत्वंनभवसि किंच ममेदमितिशरीरंप्रतीयते अतःत्वत्तःस
काशाद्भिन्नं त्वंद्रष्टाइदंदृश्यंशरीरंत्वंनभवसि दृष्टांतेनप्रतिपादयति अथादात्म्यप्र
काश्यकाष्ठान् व्यतिरिक्तोदाहकःप्रकाशकोऽग्निः तथादृश्यात् देहात् द्रष्टात्वंव्यति
रिक्तइतिसिद्धम् अन्यच्चस्वप्नांतेदिव्यशरीरभेदमास्थाय तदुचितान् भोगान् भुंजा
नएव प्रतिबुद्धोमनुष्यशरीरमात्मानंपश्यन्नाहंदेवोमनुष्यएवेति देवशरीरेबाध्य
मानेऽपि अहमास्पदंनबाध्यमानं अतस्त्वंशरीराद्भिन्नएव कस्मात् स्वापमरणादौ
दर्शनात् अपिच योहंकौमारेनानाक्रीडामनुभवं सोहंस्थविरेणसुनिवृत्तिमास्थि
तः एवंत्वंवदसितदा स्थविरकुमारशरीरद्वयंतस्यव्यवहारस्यत्वंद्रष्टाइदंशरीरंत्वंन
भवसि द्रष्टादृश्यादन्यइतिप्रसिद्धोन्यायः दृश्यतेघटादिवत् यथाघटादयोरूपा
दिमंतश्चक्षुरादिभिःकरणैरुपलभ्यंते तथादेहोपिरूपादिमान् चक्षुरादिभिःकरणै
रुपलभ्यते अतः इदंशरीरंनवदृश्यंत्वंद्रष्टाइतिसिद्धम् अपिच जडत्वंप्रदर्शयति
पंचीकृतपंचमहाभूतानित्वमेवजानासि तानिस्वात्मानंनजानंति परमपिनजानंति ३
अत्यंतजडानितानि तानित्वंनभवसि तदंशोद्भवमिदंशरीरं अपित्वंनभवसि स्वामिन् तदंशोद्

(5A)

वमिदं शरीरंकथं इत्थं यत्काठिण्यंसापृथिवी यत्द्रवंतदापः यदौष्ण्यंतत्तेजो यत्संचरतिस
वायुः यत्सुषिरंतदाकाशमिति यतस्तानिसर्वाणिभूतान्यस्मिन्शरीरेदृश्यंते तानिसूक्ष्माण्य
स्थिमांसप्रभृतीनिपंचविंशतिगुणानिपंचमहाभूतानि तेषांसमूहएवेदंशरीरंजडंदृश्यंत्वंनभ
वसि भोभगवन् स्थूलशरीरेपंचमहाभूतानिपंचीकरणानिश्रूयंते पंचदृश्यंते तानिकानिपं
चविंशतिगुणानि उच्यते अस्थिमांसस्नायुत्वक्रोमाणि एवंपृथिवीपंचधाभवति रेतोमूत्रंतथा
स्वेदोलालारक्तंतथैवच एवंआपःपंचधाभवंति क्षुधातृषानिद्राकांतिःआलस्यंएवंतेजःपं
चधाभवति धावनंप्रसारणंउत्क्रमणंचलनंसंकोचनं एवंवायुःपंचधाभवति कामःक्रोधस्तथा
लोभोमोहमात्सर्यमेवच वियत्पंचविधंज्ञेयंद्रष्टव्यंदेहमध्यतः तथाग्रंथांतरे कटिउदरहृदयकं
ठशिरःएवंआकाशंपंचधाभवति भयंपृथिवीमोहःउदकंक्रोधोग्निः कामोवायुःलोभआकाश
मिति मतांतरे भोभगवन् एकैकंभूतंपंचधाकिमितितन्नत् उच्यते परस्परानुप्रवेशात्पंचीकरणं
भोभगवन् कस्यभूतस्यकोवांशः कस्मिन्भूतेप्रविष्टः कास्थितिः उच्यते पंचानांभू
तानांप्रत्येकंद्विधाविभज्य तत्रैकमेकमर्द्धंचतुर्धाविभज्य स्वांशंपरित्यज्य तेषुयोज
नंपंचीकरणम् एवंपंचीकृतेभ्यःउच्यते अस्थिमुख्यापृथिवी विचारबलात् काठिण्यं
पीतवर्णंच मांसमुदकंसद्रवत्वात् स्नायुःतेजःज्वरेपरीक्षणत्वात् त्वक्वायुः स्पर्शध

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

धर्मत्वात् रोमाकाशंछेदनेदुःखाभावात् रेतोसुखमुदकं गर्भोत्पत्तिशुभ्रवर्णंचमूत्रं
पित्तंतेजः उष्णांगत्वात् स्वेदोवायुः श्रमप्रसंगत्वात् लालाकाशमूर्द्धाधः गमनात्
रक्तंपृथिवी लोहितत्वात् क्षुधासुखोग्निः पाचकस्वभावत्वात् तृषावायुःशोषण
धर्मत्वात् निद्राकाशंशून्यस्वभावत्वात् कांतिरुदकं शीतोष्णसंबंधात् कृष्णलोहि
तत्वंभवति आलस्यंपृथिवीजडत्वात् धावनंसुखोवायुः सबलत्वात् प्रसारणं
आकाशं व्यापकत्वात् उत्क्रमणंतेजः उत्कृष्टव्यापारत्वात् चलनमुदकंशिथिलत्वा
त् द्रवत्वात् संकोचनंपृथिवीजाड्यस्वभावत्वात् शिरस्यवकाशंमुख्याकाशंअनाह
तशब्दस्थानत्वात् कंठस्यअवकाशंवायुःमुखनासिकयोःसंचरणत्वात् हृदयअव
काशस्याग्निः सर्वदाउष्णास्थितिः उदरअवकाशंजलं जलाशयत्वात् कटिअव-
काशंपृथिवी गंधस्थानत्वात् एवंसमूहात्मकंजडत्वंनभवसि भोभगवन् सुखदुः
खंजानन् कथंशरीरंजडं एतच्छृणु देहोनजानाति सुखदुःखे तयोर्भौतिकोहर्षो
जडश्च भूतानिकदापिनजानंति तदंशोपिनजानाति अतःतदंशसंघातोदेहःक
थंजानीयात् अपिच देहःसन्नपिउत्थितंपतितंवाजानाति सुषुप्तौचौरोगृहेप ४
विश्यापहृत्याभरणानियाति इतियतोदेहोनजानाति अतोत्यंतजडः घटोयथा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

दृश्योजडश्चेति तथादेहइति ननुघटोजातस्तथैवाति ष्ठति देहस्तुवर्द्धते अतोघटवद्दे होवक्तुंनश
क्यते इतिपृष्टे गुरुरुपदिशति वृद्धिमानिति देहः किंचैतन्यभवति वृद्धिमत्त्वमपिचैतन्यं
नास्त्येव त्वयाकुत्रदृष्टंकेनोक्तं अतःदृष्टांतेनपरिहरति यथातृणगोमयंचयत्रनिंक्षिप्य
ते सराशिःवर्द्धते किंचैतन्यंभवति किंवाघटीयंत्रकूपे उद्धार्यमाणामृद्वर्द्धमानातीरे किं
चैतन्यंभवति कुड्यादिनिर्माणामुहुर्मुहुर्निक्षिप्यमाणामृद्वर्द्धमाना वेदिकायांकिंचैतन्यं
भवति एवंप्रतिदिनमन्नरूपेणसमर्प्यमाणोदेहरूपोभूतसंचयः सम्यक्वर्द्धमानोप्यत्यं
तजडएव अतस्त्वंजडोनभवसिस्वंचैतन्यमेव अनित्यत्वंप्रदर्शयति आकाशमव
काशंभवितुमिच्छति पवनोधावनमेवपतते तेजोग्निर्ज्वलितुमेवपतते उदकंद्रवितुं
जिगमिषति पृथिवीविस्तीर्णाभवितुमिच्छति एवंसर्वाणिभूतानिस्वस्वमार्गमभि
गंतुमिच्छंति अतःशरीरस्यानित्यतानिश्चिता अमंगलत्वंप्रदर्शयति जन्मकार्येपरा
मृष्यमाणः देहोमलादत्यंताशुद्धएवरक्तरेतःसंयोगेनमलभाजननिष्पन्नोदेहःमलाद
त्यंताशुद्धएव अतःदशदोषैर्दुष्टोदेहस्त्वंनभवसीतिसिद्धम् भोभगवन्केतेदश
दोषाः तच्छृणु अशुद्धंअशौचंदुर्गंधिअस्थितंस्थूलखंडंदग्धंशिथिलं नानारो
गग्रस्तंअध्रुवंआमिषंअतोहेतोः स्थूलशरीरस्त्वंनभवसि एतत्सत्यं भगवन्य

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai. "Joint project of the

(6)

आ॰बो॰ ५

दिस्थूलशरीरं अहं नभवामि एतावतामभाकिंजातांहितम् साधुसाधु अरे सावधा
नमातिः श्रृणु यदाइदंशरीरंत्वं नभवसि तदाअनित्यजाति वर्णाश्रमाश्चत्वं नभवसि
षड्भावविकारस्तवनास्ति जायते अस्तिवर्द्धते विपरिणमतेऽपक्षीयते विनश्यति
इतिषड्भावविकाराः वर्णधर्माश्रमाचारः शास्त्रयंत्रेणयोजितः निर्गतोसि जगज्जा
लात्संजरादिवकेसरीति वर्णाश्रमौ धर्माधर्मावपितवनास्त्येव वर्णाश्रमाश्रिमा
भिमानेनश्रुतेर्दासोभवेन्नरः वर्णाश्रमविहीनश्चवर्ततेश्रुतिमूर्द्धनि यतः शास्त्र
माह यावद्देहात्मविज्ञानंबाध्यतेनप्रमाणतः प्रामाण्यंकर्मशास्त्राणांतावद्देहोपप-
घनइति अहंदेहोनभवामि इतियदाज्ञानंजातं तदासर्वकर्तृत्वमपितवनास्ति भोभगव
न् इदंस्थूलशरीरंअहंनभवामि त्वदाज्ञयाजानामि स्थूलशरीरासंबंधात् वर्णाश्रमकु
लगोत्रजातिस्त्रीपुरुषनपुंसकस्थूलऱ्हस्वदीर्घश्यामगौरादिनामरूपषड्भावविकारधर्मा
धर्माः ममनास्त्येव तवकृपाकटाक्षनिरीक्षणात् सम्यक्मयाज्ञातं अन्यच्च भोभगव
न् इंद्रियाणामभावेशरीरचलनाभावात् काणोऽहंबाधिरोऽहमित्याद्यनुभवाच्च इंद्रि
याणिअहमितिपृष्टे गुरुराह तन्नभवासि कथमित्थं तद्भूतकार्यमेव भोभगवन्
कस्यभूतस्यकिंकार्यं उच्यते नभः सकाशाच्छ्रोत्रंवाक् द्विकरणे समुत्पन्नेवायोः ५

(6A)

सकाशात् त्वक्पाणिः द्विकरणे समुत्पन्ने तेजसः सकाशात् चक्षुःपादौ द्विकरणेसमु
त्पन्ने अद्भ्यः सकाशात् रसनाउपस्थे द्विकरणे समुत्पन्ने पृथिव्यः सकाशात् घ्राणपा
यू द्विकरणेसमुत्पन्ने पंचांशेन सह मनोजातं पंचानांसाधारणंसात्विकांशकार्यं पंच
वृत्तिग्राहकत्वात् बुद्धिमनोविशेषएवंतदेवविवृणोति वाक्श्रोत्रेआकाशकार्ये एवं
विचारप्राधान्येसति शब्दाभिव्यंजकत्वात् प्रायेणशब्दोत्पत्तिवाच्यस्य त्वक्पाणिवा
युविकारौ स्पर्शग्रहणसाधनत्वात् स्पर्शवत् एवंद्रव्यस्यहस्तेनोपादातुंशक्यत्वात् च
क्षुः पादौ तेजोविकारौ रूपस्यग्राहकत्वात् प्रायेणोष्णत्वंपादयोरुत्क्रमोप्यत्रप्रमाणंउ
उपस्थजिह्वेचाप्युदककार्ये एव रसग्राहकत्वात् स्निग्धत्वात् प्रायेणोपस्थआनंदत्वात्
घ्राणपायूचपार्थिवौ गंधग्राहकत्वात् प्रायेणगंधत्वाच्च पायोर्विसर्गत्वात् मनःसाधारणं
पंचानांकार्यं पंचवृत्तिग्राहकत्वात् बुद्धिमनोविशेषः पाचकपावकवत् पंचप्राणवृत्तिर्वा-
युविकारएव प्राणापानव्यानोदानसमानाः तदात्मकत्वेनोपलभ्यमानत्वात् एवंभूता
निजडानि तदंशसंयोगेंद्रियाणिजडानि भोभगवन् स्वस्वविषयंजानंतिकथमिंद्रिया
णिजडानि तच्छृणु अरेश्रोत्रमात्मानंनजानाति परमपिनजानाति स्वविषयंशब्दंज्ञातुं
नशक्यते अन्यविषयमपिज्ञातुंनसमर्थं उभयथाजडं किंतु शब्दज्ञानकरणसाधनमि

Joint Project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

आ॰बो॰ त्यर्थः प्रदीपवत् यथाप्रदीपः रूपादिज्ञानसाधनं यथादीपेनरूपादिप्रतिगृह्यते तथाश्रो
६ त्रेणशब्दमिति एवमितराण्यपिकरणानि कर्मेंद्रियाणि क्रियासाधनान्येव यथादर्वीवत्
अत्यंतजडानित्वंनभवसि इतिसिद्धम् त्वंतुज्ञानमेव भोभगवन् प्राणेसतिदेहश्चेष्टतेइं
(२) द्रियाण्यपिचेष्टंते प्राणेगतेदेहश्चेष्टाहीनोभवति इंद्रियाण्यपितादृशानिभवंति अहमश
नावानहंपिपासावानित्याद्यनुभवात् अतःप्राणएवाहंत्वंनभवसि कथं उच्यते तच्छृणु
चैतन्याभावात् सुषुप्तोस्वप्नेच उच्छ्वासनिःश्वासरूपेणप्रवर्तमानोप्ययमंतर्बहिश्चरन् नजाना
ति चोरोगृहेप्रविश्यापहृत्यभूषणानिगच्छतिसति नजानाति अतोत्यंतजडाएवप्राणाद
यः देहवदेव अपिच एकस्मिन्पर्यंके शयनेसस्त्रियंस्वपुरुषेस्थितेसति कश्चिज्जारआ
गत्यस्त्रियासहभूषणानिपरिहृत्यगच्छति इत्थंनकर्तव्यमितियतोननिवारयति अतोत्यं
तजडः प्रबुद्धेजानातिइतिचेत् नसर्वावस्थासूच्छ्वासनिश्वासरूपेणास्योपरतिर्नास्त्येवस्थि
त्वाप्यसौनजानाति कथमित्थं इदानींकस्मिन्भागेश्वासोवर्त्तते इतिपृष्टेऽपिअस्मिन्भा
गेअहंवर्त्ते इतिप्रतिवक्तुंनजानाति अतःस्थित्वापिनजानातितस्यायमर्थः ननुजड-
श्चेत्प्राणः कथंजडंशरीरंजडोपिचेष्टयति उच्यते जडोपिजडंचेष्टयन् लोकेदृश्यते ६
कुतः प्रचंडमारुतः गृहछादनपर्णशाखावृक्षं अन्यत्रपातयति अतःजडस्यापिअयमेव

(7A)

स्वभावः नैतावतात्माभवति प्राणस्यस्वचेष्टानस्वतंत्राऽतः कर्माधीनैव कथं इत्थं जाग्रत्स्थि
तिनिमित्तंकर्मोद्भूतंभवति तदुपक्षयेसर्वाणिकरणानिगृहीत्वाबुद्ध्युपाधिसंपर्कजनितविज्ञा
नेनसस्वप्नंसुषुप्तिंवागच्छति एवंस्थानत्रयमनुवर्तमानोगच्छति कर्मानिमित्तंचइदंगमनागम
नं प्राणोपितत्कर्मवशादेव शरीरंपरिपालयन्वर्तते प्राणापानव्यानोदानसमानाःपंचवायवः
हृदिप्राणोगुदेऽपानः समानोनाभिसंस्थितः उदानः कंठदेशस्थोव्यानः सर्वशरीरगः के
चित्तु नागकूर्मकृकलदेवदत्तधनंजयाः अन्यस्यापिव्याख्यानादिव्यापारचेष्टांकर्त्तुंनसम
र्थाः अतःजडाएवप्राणादयः नागादुद्गारः कूर्मोनिमेषोन्मेषयोः कृकलः क्षुत्करः देवद
त्तोजृंभणकरः धनंजयःपोषणकरः एतत्प्राणमयः कोशोभवति अन्यस्यापिव्याना
दिव्यापारचेष्टांकर्त्तुंनसमर्थाः अतःजडाएवप्राणादयः एवंइंद्रियसमूहात्मकंसप्तदशकं
लिंगशरीरंत्वंनभवसीतिसिद्धंमाभूत् भगवन् मनसिस्वस्थेपश्यामि शृणोमि अहंसंक
ल्पवान् विकल्पवान् इत्यनुभवाच्चमनसिव्यग्रेनपश्यामिनशृणोमि अतःमनएवाहं त्वंनभ
वसि तत्कथं इत्थं तदानींमेमनोन्यत्रगतं इदानींस्थिरीभूतं उभयवृत्तिंयोवेत्तिसमनो
नभवति मनसःसकाशात्त्वंद्रष्टाभिन्नएव अपिच तन्मनः साबुद्धिरित्युच्यमानेप्रतीक्षणं
विलक्षणोऽयुगपद्भावनियतयोःएकस्यनाशेअन्योत्पत्तिः मनउत्पत्तिमान् विनाशवच्चसुषुप्तेरभावा

दिति तवैवानुभवः अत्रश्रुतिरपि आत्मनोमनोजातं इतितत्रैवविलीयते इति अतः मनःत्वंन
भवसीतिसिद्धम् एवंइंद्रियसमूहात्मकं सप्तदशकं लिंगशरीरंत्वंनभवसीतिसिद्धम् भो
भगवन् एतत्सत्यं लिंगशरीरमहंनभवामि अनेनज्ञानेन ममकिंलाभोभविष्यति अ
रेसावधानमतिः शृणु यदालिंगशरीरंत्वंनभवसीति तदागमनागमने स्वर्गनरकादिभो
गोऽपितवनास्त्येव यथाजानुनिभग्नेपंगुरिव शास्त्रमाह प्ररोहतिक्वापिनधान्यबीजंदग्धं
तथाज्ञानमयानलेन तत्कार्यकर्मगुणालिंगदेहे दग्धेसमस्तेनपुनर्भवोस्ति अपिच तथा
लिंगशरीरनाशेगमनागमने तवनास्त्येव अपिचप्रारब्धफलभोगोपितवनास्त्येव भोभ
गवन् तत्कथं इत्थं देहोभोगायतनं विषयजातानिभोग्यानि इंद्रियाणिभोगसाधनानि
मनोबुद्धिर्भोक्ता एवंभोक्ताभोगायतनंभोग्यानि भोगसाधनानि एतच्चतुष्टयंत्वंनभवसि
तस्मादारंभकर्मफलभोगः तवनास्त्येव भगवन् जाग्रत्त्वमेसुखदुःखमनुभवन् कथं
सुखंदुःखंममनास्ति तच्छृणु अरे शरीरगतचक्षुःशूलउदरवेदनादयः सुषुप्त्यवस्था-
मापन्नस्यबुद्धिरहितस्यतवनप्रतीयंते अतस्तेतवधर्मानभवंति क्षेत्रस्यैवतत्त्वंतथास्वा
त्मनिमन्यसेमूढः यथाजलस्यचंद्रे यतः शास्त्रमाह नहवैसशरीरस्यसतः प्रियाप्रिय ७
योरपहतिरस्ति अशरीरंवावसंतंनप्रियाप्रियेस्पृशतइति श्रुतिशास्त्राच्च कामःसंक

(8A)

त्योविचिकित्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीः इत्येतत्सर्वंमनएव अत्रभगवद्वचनं
इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः एतत्क्षेत्रंसमासेनसविकारमुदाहृतम्
स्मृतिरपि रागेच्छासुखदुःखादिबुद्धौसत्यांप्रवर्तते सुषुप्तौनास्तितन्नाशेतस्मा
द्बुद्धेस्तुनात्मनः अंतःकरणधर्मइत्यर्थः इतिश्रुतिस्मृतिगुरूक्तःस्वानुभवात् लिंगशरी
रमहंनभवामीति यदाज्ञानंजातंतदानामायोनिभ्रमणभ्रंशःनवगुणरहितोभवसि
स्वामिन् तेनवगुणाःके तान्शृणु बुद्धिरागभययत्नद्वेषसंस्कारधर्माधर्मसुखदुःखेति
भोभगवन् अंतःकरणेबाह्यकरणेपि अहमनुसंधातादेहोहंनभवामि इंद्रियाणि
अहंनभवामि प्राणोऽहंनभवामि मनोबुद्धिरहंकारोनभवामि एतत्सर्वस्यानुसंधा
तामामहंनजानामि इतिभ्रमश्चित्ते अतःकोहंदेहीतिनिःसंदेहंभ्रांतिनिरासंकुरु
ममेतिविज्ञापितःसन् गुरुरुपदिशति तत्कथम् इत्थं किंनजानामीतितवकारणशरी
रमव्याकृतमज्ञानसांज्ञिकमस्ति तत्कथम् इत्थम् इदंसर्वंदृश्यंपृथक्पृथक्रूपंत्वंजाना
सि आत्मानमेवंनजानासि इतिवदसिएतदेव तवात्मज्ञानम् इदमेवकारणशरीरम्
अस्याश्रयत्वमेवतत्कथम् इत्थं त्वदन्यःकोपिनजानाति इतित्वमेववदसि मामहंन
जानामीति अतःतस्याज्ञानस्यत्वमेवाश्रयः अज्ञानभ्रमंचत्वंसम्यक्वेत्सि अतस्त्वं

(9)



जडोनभवसीतिवेद्यवेत्तृत्वात् अतस्त्वंज्ञानंतस्याज्ञानस्याश्रयः किंज्ञानं तत् ज्ञानमपित्वमे
व त्वयिस्थितमज्ञानंयतोजानासि अतः तस्य एवपृथक् साक्षी तवदृश्यमानंत्वंनभवसि
स्थूलसूक्ष्मशरीरवत् अतःकारणशरीराद्भिन्नस्त्वं एवमाश्रयविलक्षण ज्ञानमात्रसाक्षी
स्वरूपस्त्वमेव मांकोहमितिवदसि अनवच्छिन्नाखंडदंडायमानज्ञानस्वरूपोभवान् को
हमितिवदसि तत्रनिःसंशयःशृणु इंद्रियाणिस्वात्मानंस्वस्ववृत्तिंचनजानंति परस्पर
मपिनजानंति अतःजडानि त्वंतु इंद्रियाणिइंद्रियवृत्तिंचसदाजानासि मनःस्वात्मानं
नजानाति परस्परंबुद्ध्यादिव्यापारंकर्तुंनसमर्थः अतःजडानि त्वंतुमनोबुद्ध्यादीनिसदा
जानासि अतस्तवस्वरूपंज्ञानमेव यथाराहोःशिरःशिरएवराहुः तथाज्ञानमेवत्वम्
तथाचश्रुतिः येनवापश्यतियेनवाशृणोति येनवागंधानाजिघ्रति येनवावा चंव्याकरोति
येनवास्वादुचास्वादु चविजानाति तद्विज्ञानंब्रह्म योवेत्तिविश्वंनचतस्यास्तिवेत्ता तमाहु
रग्र्यंपुरुषंपुराणं तस्यभासासर्वमिदंविभाति स्मृतिः इंद्रियाणिपराण्याहुरिंद्रियेभ्यः
परंमनः मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ज्ञानमात्रस्त्वमितिभावः अथविविधिसु
खेनप्रतिबोधयति यतोज्ञप्तिस्वरूपस्त्वं अतस्तवाज्ञानं नास्ति यथासूर्येतमः अतः तस्या ८
ज्ञानस्यनिवर्तकंज्ञानमपिनास्तिज्ञानस्वरूपत्वात् तथादीपस्यान्यदीपेच्छानास्त्येव —

(9A)

प्रकाशस्वरूपत्वात् तस्मादज्ञानज्ञानोद्भवौबंधमोक्षावपितवनस्तः अतोनित्यमुक्तए
वत्वं यतःशास्त्रमाह अनात्मन्यात्मधीर्बंधस्तन्नाशोमोक्षउच्यते बंधमोक्षौनविद्येते
नित्यमुक्तस्यचात्मनःअतस्त्वंचिद्रूपः सद्रूपत्वंप्रदर्शयति चक्षुरादीनिकरणान्यादित्या
द्यनुगृहीतानिस्वस्वविषयेषुप्रवर्तंते तत्र बुद्धिःकरणव्यापारमनुभवति त्वंतुचैत
न्योज्वलितोभयात्मकःद्रष्टा दृश्याकारांविपरिणमते तज्जागरणंभवति तस्यसा
क्षित्वंचैतन्योजाग्रत्संस्कारप्रत्ययवासनावासितबुद्धिः पुष्पपुटिकावत् त्वंचैतन्योज्व
लितोभयात्मकद्रष्टा दृश्याकारंविपरिणमते तत्स्वप्नोभवति स्मृतिरपि अर्थाभा
वेयदाज्ञानंप्रत्यक्षमिवदृश्यते गंधर्वनगराकारंस्वप्नंतदुपलक्षयेत् यथाचित्रपट
वत् तस्यपृथक्भूतःसाक्षीत्वमेव जाग्रत्स्वप्नावस्थासर्वसंस्कारैःसहबुद्धिविद्यायांलीना
साविद्यासंस्कारमात्रावशिष्टात्वयिविचन्योति निर्विकल्पानुभवोभूत्वातिष्ठति इयंसुषुप्त्य
वस्था तथाचश्रुतिः नकंचनकामंकामयतेनकंचनस्वप्नंपश्यति सुखरूपमेवेतियोवे-
त्ति तस्यसत्वंसाक्षीस्वरूपं एवमवस्थात्रयभावाभावसाक्षी अनुस्यूतंएवंपृथक्भूत-
चैतन्यत्वं अतःकालत्रयस्थायी सर्वदाभावरूपमित्यर्थः अन्यस्यसतामसतांस्वयंज्ञा
नासि स्वसत्तास्वतएवप्रमाणं स्वसत्ताज्ञानाश्रयंविनानसंभवति यतः अतःस्वस

(19)

आ॰बो॰ त्तानुभवसिद्धं अतः तवस्वरूपंसद्रूपं आनंदरूपतांप्रदर्शयति स्वविषयेषुव्यावृत्तानिइं
१ द्रियाणितेषुश्रोत्राणि त्वयिसुखस्वरूपेविश्रम्यंति तेनसुखरूपंपुनःसुखस्वरूपात्
उत्थितानि स्वव्यापारेसमर्थानिभवंतीत्यर्थः यथापुदसुगंधवत् अतः तवरूपमानंद-
स्वरूपम् अद्वितीयंप्रदर्शयाति आब्रह्मादिपिपीलिकांतमनुस्यूतम् अंतर्यामीसाक्षीए
कएव अतस्तवस्वरूपमद्वितीयम् तथाचश्रुतिः एकोदेवः सर्वभूतेषुगूढः सर्वव्यापी
सर्वभूतांतरात्मा कर्माध्यक्षःसर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणश्चेति ननुसाक्षी
सप्रपंचःसद्वितीयः किंनभवतिशृणु मृद्विकारेषुमृदिवसुवर्णविकारेषुसुवर्णमिव तंतुकार्येषुतंतु
रिव चिद्विवर्तश्चिदेव रज्जुसर्पवत् शुक्तिकारजतवत् यतस्त्वमद्वितीयः अखंडत्वंप्रदर्शयति वि
जातीयस्वजातीयस्वगतभेदरहितत्वात् एकरसः अखंडस्त्वं सैंधवघनवत् अचलत्वंप्रदर्शयति
जन्ममृत्युरहितत्वात् त्वंअचलः अजत्वंप्रदर्शयति अनादित्वात्कारणरहितत्वात्त्वं अजः अक्रियत्वंप्र
दर्शयति यथाभ्रामकसंनिधिसत्तामात्रेण जडमयंलोहंचेष्टते तथाहंकारममकारेच्छा
प्रयत्नरहितस्य सच्चिदानंदस्वरूपस्य तवसत्तासंनिधिमात्रेण देहेंद्रियाणिमनोबुद्धिप्र
काशात् सदसत्क्रियाउत्पद्यते अतस्तवस्वरूपमक्रियम् तथाच आत्मचैतन्यमाश्रित्य १
देहेंद्रियमनोधियः स्वकीयार्थेषुवर्त्तंतेसूर्यालोकेजनाइव अत्रभगवानाह शरीरवा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

ङ्मनोभिर्यत्कर्मप्रारभतेनरः न्यायंवाविपरीतंवापंचैतेतस्यहेतवः सच्चिदानंदमक्रियम
स्वरूपंतव सत्यस्वभावः यथा अग्नेरुष्णवत् सवितुः प्रकाशवत् अथकूटस्थस्वरूपत्वं
प्रदर्शयति कूटस्थमविकारि कूटवत्तिष्ठतीतिकूटस्थः अतस्त्वंकूटस्थः अनंततांप्रदर्शय
ति अव्यक्तादिपृथिवीपर्यंतं सर्वतत्वेषुपूर्वव्यापकंचैतन्यं यथाघटोत्पत्तेःपूर्वंव्यापकंनभः
अतस्त्वंअनंतस्वरूपः स्वप्रकाशत्वंप्रदर्शयति तवदृश्यमानमिदंसर्वंत्वंनभवसि इति
तवैवानुभवः सच्चिदानंदस्वरूपस्त्वंभवसि तवैवस्वसंवेद्यं अतस्त्वंस्वयंज्योतिः स्वरू
पः ब्रह्मत्वंप्रदर्शयति बृहत्वाद्बृंहणत्वाद्वा प्रत्यगात्मेहचोच्यते तत्त्वंब्रह्मपरंरूपंगी
यतेबहुधाश्रुतिः अतस्त्वंब्रह्मसच्चिदानंदाद्वितीयमखंडमचलमजमक्रियंकूटस्थमनं
तस्वरूपम् स्वप्रकाशंब्रह्म एतैर्द्वादशाभिर्विशेषणैर्विशेषितम् यत्परंब्रह्मतदेवाहमि
तिप्रतिपद्यते यथा नीलेमहत्सौगंधोत्पलवदात्मा एवंनित्यशुद्धबुद्धमुक्तमलुप्तस्वभावदृ
क्त्वं इति तवैवानुभवोजातः अत्रश्रुतिरेवप्रमाणं प्रज्ञानस्यनामधेयानि आत्मावाइ
दमेकएवाग्रआसीत् तत्सृष्ट्वातदेवानुप्राविशत् अतः प्रविष्टः शास्ताजनानां अनंत
रमबाह्यंसबाह्याभ्यंतरोह्यजः अशरीरंशरीरेषु ज्ञात्वादेवंसर्वपाशापहानिः अत्रायं
पुरुषः स्वयंज्योतिर्भवति योयमविनाशीपुरुषः प्रत्यगानंदमयःपुरुषः सहस्रशीर्षापुरु

षः योयममृतमयः पुरुषः विज्ञानमानंदंब्रह्म प्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्म सत्यंज्ञानमनं
तंब्रह्म एकमेवाद्वितीयंब्रह्म अयमात्माब्रह्म स्मृतिभ्यश्च क्षेत्रज्ञंचापिमांविद्धिसर्व
क्षेत्रेषुभारत नवद्वारेपुरेदेही अनादित्वान्निर्गुणत्वात् समंसर्वेषुभूतेषु उत्तमःपुरुष
स्त्वन्यः नजायतेम्रियतेवाकदाचित् नादत्तेकस्यचित्पापं अविभक्तंचभूतेषुविभक्त
मिवचस्थितम् विद्याविनयसंपन्ने वासुदेवःसर्वमिति उपद्रष्टानुमंताच सर्वेंद्रियगु-
णाभासं आत्मैवदेवताःसर्वाः एतैरन्यैश्चविशेषणैर्विशेषितंपरंब्रह्म त्वमसि तत्त्वम
सीतिस्वानुभवब्रह्माहमस्मीति श्रुतिस्मृतीगृहीत्वाश्रीगुरोराज्ञया एवंवेदवाक्यतःगु
रुतःस्वतः त्रिप्रकारेणब्रह्माहमस्मि इतिज्ञात्वासमुक्तइति तथाचश्रुतिः वेदाहमे
तंपुरुषंमहांतंआदित्यवर्णंतमसःपरस्तात् तमेवविदित्वातिमृत्युमेतिनान्यःपंथावि
द्यतेयनाय तत्राह अन्यथाशास्त्रगर्तेषुलुठतांभ्रमतामिह भवताकृतमज्ञानंक-
ल्पैरप्यनिवर्तते यावदज्ञानभावःस्यात्तावद्वैतस्यभावना भेदभावाद्वयोदेतिसर्वस्मि
न्नेकतांलयः ज्ञानंभक्तिंचवैराग्यमेतदेवनसंशयः ज्ञात्वैक्यंसहजंप्रेमाविवेकेनैव
नान्यतः तस्मात्साधनानंतरंनास्ति अत्रभगवद्वचनम् यएवंवेत्तिपुरुषंप्रकृतिं १०
चगुणैःसह सर्वथावर्त्तमानोपिनसभूयोऽभिजायते बहूनांजन्मनामंतेज्ञानवान्

(11A)

मांप्रपद्यते वासुदेवः सर्वमितिसमहात्मासुदुर्लभः तस्मात्सर्वमहंब्रह्मवासुदेवाख्यम-
व्ययम् ज्ञातव्यंएतत् ज्ञेयंनित्यमेवसंस्थितंनातः परंवेदितव्यंहिकिंचित् एकएवआ
त्मापरंब्रह्मसंसारधर्मविमुक्तस्त्वमितिसिद्धम् एवंत्वमभयंप्राप्तोसि संसारदुःखान्मु-
क्तोभवसि एतत्सर्वंविमृश्ययथेच्छसितथाकुरु अतःत्वंवेदंकिंकरोनभवसि यतःशा
स्त्रमाह आत्मानमद्वयंकश्चिज्जानातिजगदीश्वरम् यदेच्छतितत्सकुरुतेनभयंतस्यकुत्र
चित् आत्मैवेदंजगत्सर्वंज्ञानंयेनमहात्मना यदृच्छयावर्तमानं तंनिषेद्धुंक्षमेतकः भो-
भगवन् यद्यपिज्ञानोत्पत्त्यनंतरंपुनर्जन्माभावउक्तः तथापिप्राक्ज्ञानोत्पत्तेः अत्रजन्म
निकृतानांकर्मणांउत्तरकालभाविनांचयानिचातिक्रांतान्यनेकजन्मकृतानि तेषांचफल
मदत्वानाशोनयुक्तइति तस्मात् त्रिः प्रकाराण्यपित्रीणिजन्मान्यारभेयुः संहतानिवा
सर्वाण्येकजन्मारभेत् अन्यथाकृतविप्रनाशोसर्वत्रानवस्थाप्रसंगः शास्त्रानर्थक्यं
स्यादिति नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपि अवश्यमेवभोक्तव्यंकृतंकर्मशुभा
शुभमिति नजन्मजायतेइतिअयुक्तम् तन्न ज्ञानाग्न्युपसृष्टानिसर्वकर्मबी
जानिदह्यंते नांकुरयंति तथाचश्रुतिः बीजान्यग्न्युपदग्धानिनारोहंतियथापुनः
ज्ञानदग्धैस्तथाक्लेशैर्नात्मासंपद्यतेपुनरिति अस्तुतावत् ज्ञानोत्पत्त्यनंतरकालकृता

(12)



नांकर्मणांज्ञानेनदाहोज्ञानसहभावित्वान्नत्विहजन्मनिज्ञानोत्पत्तेः प्राक्कृतानामती
तान्यनेकजन्मांतरकृतानांकर्मणांदाहोनयुक्तः तन्न तस्यतावदेवचिरंयावन्नवि
मोक्षइषीकातूलवत् सर्वाणिकर्माणिप्रदह्यंते स्मृतिरपि ज्ञानाग्निःसर्वकर्माणि
भस्मसात्कुरुतेतथा भगवद्वचनात् सर्वाणिकर्माणिइतिविशेषणात् यथावर्त-
मानजन्मारंभककर्माणिनक्षीयंते फलदानायप्रवृत्तान्येवसत्यपिज्ञाने तथानारब्ध
फलानामपिकर्मणांक्षयोनयुक्तइतिनदसत् तेषांमुक्तेषुवत् प्रवृत्तफलत्वात् यथापू
र्वंलक्ष्यवेधायमुक्तइषुर्धनुषोलक्ष्यवेधोत्तरकालमप्यारब्धवेगक्षयात् पतनेनैवनिव
र्त्तते एवंशरीरारंभककर्मशरीरस्थितिप्रयोजनेनिवृत्तेपि आसंस्कारवेगवशात् पूर्व
वत् वर्ततएव किंबहुनायंदेहयात्रामात्रार्थास्वेच्छाःनिच्छापरेच्छाप्रभवानि आरोपित
सुखदुःखलक्षणानि प्रारब्धफलान्यनुभवन् तत्करणाभासादीनामवभासकःसन्
तिष्ठत्येव प्रारब्धकर्मक्षयात् जीवन्मुक्तानांपुनर्जन्माभावः तथाच शास्त्रेणनश्येत्
परमार्थबुद्धिःकार्यक्षमंनश्यतिचापरोक्षात् प्रारब्धनाशात्प्रतिभासनाशःएवंक्रमा
न्नश्यतिचात्ममाया कर्मणःमायामूलत्वात् मायानाशेसर्वकर्मभस्मसाद्भवेत् ननुज्ञा ११
नोत्तरकालेस्वेच्छयाकृतानांकर्मणांशरीरांतरेणापिभोगोभवत्वितिचेत् तन्न तस्य

(12-A)

कर्मफलोपचये कर्त्तृत्वाभिमानोनास्त्येव असंगोनहिसज्जते एतेइच्छादयः आत्मन्यारोप्यं
ते क्षेत्रधर्माः सदृशंचेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ध्यायतीवलेलायतीवेतिहिश्रुतेः
गुणागुणेषुवर्त्तंते इत्यनुसंधानेनशरीरयात्रास्थितिर्नप्रसिद्ध्येत् अन्यथाशरीरयात्रा
स्थितिर्नप्रसिद्ध्येत् तथाच गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः यज्ञायाचरतःक
र्मसमग्रंप्रविलीयते जीवन्मुक्तस्यप्रारब्धक्षयेशरीरपातात्पूर्वंत्विहकर्मविभागंशृणु
तदधिगमेउत्तरपूर्वाघयोरश्लेषविनाशौ तस्यपुत्रादायमुपयांति सुहृदःसाधुकृत्यां
द्विषंतःपापकृत्यां नतस्यप्राणाउत्क्रामंतेऽत्रैवसमवलीयंते किंच प्रारब्धंनिश्चयाद्भुक्त्वाशे
षंज्ञानेनदह्यते शारीरंत्वितरत्कर्मतद्द्वेषिप्रियवादिनोः अनारब्धंहिज्ञानेननिर्वीर्यंक्रि
यते अपिच अस्यजीवन्मुक्तस्यप्रारब्धभोगार्थंशरीरधारणेकोदोषः यथाउत्खात
दंष्ट्रोरगवत् अविद्याकार्यंदेहद्वयमस्ति तत्किंकरिष्यति स्वामिन्कारणनाशेकार्य-
मस्तितंतुनाशेपटोस्ति इतिकेनदृष्टं केनाचार्येणोक्तं उच्यते कारणनाशेकार्यम
स्ति लोकेदृश्यते रज्जुरिवसर्पः यथा रज्जुस्वरूपेज्ञाते सर्पज्ञानंनिवर्त्तते तथापि
भयजनितकंपादिकंवर्तते तथाचश्रुतिः यथाहिनिर्ल्वयिनीवल्मीकेमृताप्रत्यस्ता
शयीतैवमेवेदंशरीरं अस्मिन्विद्वच्छरीरेपतितेस्थितेवासमुक्तः दग्धपटवत्

आ॰बो॰ यतइति श्रुतिरपि सदेवमुक्तइति ब्रह्मैवसन्ब्रह्माप्येति विमुक्तश्चविमुच्यते स्वभावत
१२ स्त्वंनित्यमुक्तएव इदानीमपियथा स्वप्नद्रष्टास्वप्नगतभयेनैवप्रबुद्धः स्वप्नव्यवहारेसर्व
स्मिन्मिथ्याभूतेनिरस्तेसति सत्यस्वरूपंस्वयमेव वशिष्यते तथैवभ्रांतिमूलसंसारस
हास्वप्नव्यवहारेसर्वस्मिन्मिथ्याभूतेनिरस्ते सत्स्वरूपंस्वयमेवावशिष्यते ननुप्रारब्ध
कर्मक्षयात् शरीरनाशः शरीरनाशात्पुनर्जन्माभावः सर्वविशेषरहितंशून्यमेवजातं
तर्हिनैवाहमिदमुच्यते किंचप्रमाणाविषयत्वान्नास्ति ब्रह्मेतिप्रसज्यते ततश्चअसदेव
प्रशस्तंसत्यस्वरूपंस्वयमेवावशिष्यते तत्किमर्थमंगीकरणीयंतदसत् तत्शृणु निर्मु
च्यापित्वचंसर्पः स्वस्वरूपंनमुंचति नास्त्यात्मेतियोहेतुमितिवक्तुंनसज्जते किंच यथा
चंद्रोप्यमावास्यायामलिंगत्वान्नदृश्यते तथात्मा ज्ञानयोगेननभासतेस्फुटतरम् किं
च अमावास्यायांयथाचंद्रोदृश्यतेनार्कयोगतः दृश्यस्यक्षयात्तथाद्रष्टृव्यवहारोनदृश्य
ते अथातआदेशोनेतिनेति अस्थूलमनएवन्ह्रस्वइतिश्रुतेः यतोवाचोनिवर्त्तंतेअप्रा
प्यमनसासह यद्वाचानभ्युदितमित्यादिनिषेधस्यसिद्धिर्नास्ति सर्वस्यनंनिषेधस्यसाव
धिकत्वात् अतएवसत्यस्वरूपंअवशिष्यते यन्निषेधद्वाराअसदुक्तंतत्सर्वप्रपंचस्यनत्वा १२
त्मनः यदात्मनअसदुक्तंभवति तदावंध्यापुत्रेणकार्यंकथंनिर्वहति अतएवसदेवप्रमा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(13A)

णमात्मनः सत्संपत्तिः सद्भावेश्रुतिःप्रमाणं सदेवसौम्येदमग्रआसीत् सत्यंज्ञानमनंतंब्रह्म
स्मृतिरपि अविनाशितुतद्विद्धियेनसर्वमिदंततन मित्यादि किंच ब्रह्मसद्भावेप्रमाणापेक्षा
नास्ति स्वतःप्रमाणंब्रह्म जाग्रदाद्यवस्थात्रयेषुप्रमातृता व्यभिचारात्कूटस्थनित्यतासिद्धिः
सुषुप्तौव्यभिचारादितिचेन्न तत्रापिप्रमेयत्वमेवनिवारयंतिसर्वेलोकाः कथंनाहमत्रसुषु-
प्तौ किंचिदुपलब्धवानिति नप्रमातृत्वमसिद्धस्यहिवस्तुनः परिस्थितिंप्रतिप्रमाणापेक्षा
नत्वात्मनः आत्मनश्चेत्प्रमाणापेक्षासिद्धिः कस्यप्रमातृत्वंस्यात् यस्यप्रमातृत्वंसएवात्मे-
तिनिश्चीयते अतएवस्वतःसिद्धएवात्मा नप्रमाणापेक्षा यदिदंदृश्यजातंतदविद्याकृत
त्वात् प्रतीतिमात्रंकूटस्थतानित्यसिद्धत्वादात्मसत्तासामान्यमनुस्यूतंवर्त्ततएव नाभावोवि
द्यतेसतः अतःसत्स्थूलकार्यंअसत्सूक्ष्मकारणं तत्सर्वंचिद्विवर्त्तरूपेणब्रह्मैवभाति तथा
च विस्तारःसर्वभूतस्यविष्णोर्विश्वमिदंजगत् द्रष्टव्यमात्मवत्तस्मादभेदेनविचक्षणैः य
स्मात्ज्ञानादृते नास्त्यर्थसत्ता तस्माज्ज्ञानमेवसत्यं ननु ज्ञानंतुकथंएकंबहुधाकारं तत्
शृणु अनिर्वाच्यामहतीमायालक्षणाशक्तिर्यथाचनानाभावंजनयति तथाचश्रुतिः इं
द्रोमायाभिःपुरुरूपईयते ननुद्वावेतौब्रह्मणोरूपमित्युक्तत्वात् वास्तवंद्वैतंभवतु नैवं
अविद्याकृतत्वात् तद्वैतमिव नतुवास्तवम् तथाच यत्रहिद्वैतमिवभवति तदितरः इतरं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१५)



पश्यतिइत्यादि यत्रत्वस्यसर्वमात्मैवाभूत् तत्केनकिंपश्येत् येनेदंसर्वंविज्ञातंतंकेनविजा
नीयात् नान्योतोस्तिद्रष्टानान्योतोस्तिश्रोता नान्योऽतोऽस्तिविज्ञाता यदयंसर्वमात्मा वि
ज्ञातारमरेकेनकंविजानीयादिति एतत्सर्वमखिलमात्मैव अतस्तद्भासकंनित्यशुद्धबुद्ध
मुक्तस्वभावं प्रत्यक्चैतन्यमेवात्मतत्वं इतिवेदांतविद्वदनुभवः श्रुतिगुरुप्रसादेनजाय
मानाब्रह्मापरोक्षवृत्तिःसाधनेनप्रबुद्धः सर्वस्मिन् मिथ्याभूते अप्रमेयंस्वस्वरूपंस्वय
मेवावशिष्यते एवंमायानिद्रायाःप्रबुद्धःसन् जीवन्मुक्तःप्रारब्धकर्मजनितफलाबा
धितल्लोकमनुगृण्हन् पूर्ववत्तिष्ठति शास्त्रमपि ज्ञात्वासर्पंसर्पोत्थंयथाकंपेनमुंचति
विध्वस्ताखिलमोहोपिमोहकार्यंतथात्मवित् अस्यजीवन्मुक्तस्यदेहधारणंलोकस्यो
पकारार्थमिति श्रुतिरपि अशनाच्छादनेस्वशरीरंनोपभोगार्थायलोकस्योपकारार्थं
यच्चपरिग्रहेत् भोभगवन् लोकस्योपकारःकिं उपकारस्त्रिविधश्चेति तत्कथंइत्थंदर्श
नंभजनंसंभाषणंचेति दर्शनेनपापक्षयोभवति भजनेनश्रेयोत्तरोत्तरवृद्धिः भवति सं
भाषणेनमोक्षोभवति एवंनित्यशुद्धबुद्धमुक्तसत्यस्वभावस्वरूपोऽहं एवंविधोबोधआ
चार्यप्रसादात् अज्ञानात्प्रबुद्धःसंसारविनिर्मुक्तोभवति श्रुतिरपि आचार्यवान्पुरुषोवेद- १३
आचार्याद्धैवविद्याविदिता तरतिशोकमात्मवित् भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः

(15A)

क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेऽर्जुन ब्रह्मविद्ब्रह्मैव भवति इदानीमन्यविद्योपासनेदोषमाह किंच अन्यविद्याक्रियाउपदिशंतिकालांतरे अनित्यफलतां दर्शयंति श्रुतिरपिसर्वाविद्याक्रियापरा यदिक्रियाफलंमोक्षोभवेत् अनित्यत्वंप्रसज्येत यद्वत् स्वर्गादिनश्येदिति अमुमेवार्थंश्रुतिरप्याह यथेहकर्मचितोलोकः क्षीयते एवमेवामुत्राजितोपुण्य लोकःक्षीयतइति स्मृतिरपि क्षीणेपुण्येमर्त्यलोकंविशंति अतःआचरणेदुःखंफलेस्पर्द्धादुःखंभो गांतेपतनंदुःखं एवमन्यविद्योपासनाद्दुःखाद्दुःखमाप्नोति श्रुतिरपि मृत्योःसमृत्युमाप्नोति यइहनानेव पश्यति योन्यदेवताःउपासते सदेवानांपशुः अन्योसावहमन्योऽस्मीत्युपासतेनसवेदयथापशुःत स्मादन्यविद्यांपरित्यज्य इमामध्यात्मविद्यामाश्रयेत् साविद्याकीदृशी अत्रभगवतोक्तं राजविद्याराज गुह्यंपवित्रमिदमुत्तमम् प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययम् किंच यथाग्निहोत्रादीनांस्वर्गा- दिफलंदर्शयतिश्रुतिः तथाचब्रह्मविद्याविज्ञानादपिपरमपुरुषार्थंदर्शयति श्रुतिरपि श्रुतयोब्रह्मवि द्यानंतरंमोक्षंप्रदर्शयंति किंच मध्येकार्यांतरंवारयंति ब्रह्मविदाप्नोतिपरमिति वेदान्तशासनंवेदान्त शासनमिति अथपठतांधूर्तानामश्रद्धानानांनास्तिकानामुत्पथगामिनामेतद्विद्यांनप्रकाशये त् यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइतिश्रुतेः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यकृतात्मबोधिनी संपूर्णा श्रीशंकरःजयः

॥ ॥ हेंपुस्तक मु॰ मुंबई येथें बोंबेटाउनप्रेस छापखान्यांत छापिलें॰ शके १७८२ ॥

इतिश्रीशंकराचार्यकृत आत्मबोधः संपूं॰

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com